# Nrisimhaikadashi

# નૃસિંહૈકાદશી

## Document Information

Text title : Nrisimhaikadashi

File name : nRRisiMhaikAdashI.itx

Category : vishhnu, dashAvatAra, vishnu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# નૃસિંહૈકાદશી

(અખણ્ડપાદયાત્રિણા મેલુકોટે અરૈયરદાસેન ઉપાસિતા)
નૃસિંહમૂર્તે બહુસિંહમૂર્તે પ્રહ્લાદરક્ષાર્થ સુલક્ષ્યમૂર્તે ।
હિરણ્ય દુર્હૃત્ પ્રવિદારિમૂર્તે મનો મદીયં ભવ વિશ્વમૂર્તે ॥ ૧॥

સન્તાપશાન્તિં કુરુ યોગમૂર્તે યોગસ્ય શક્તિં દિશ સર્વમૂર્તે ।
સર્વેષુ ભક્તિં ભર ભક્તમૂર્તે । ભક્તિં સદા વર્ધય લોકપૂર્તે ॥ ૨॥

પુન્નાગચામ્પેયમહાસુગન્ધે સુદીર્ઘ "હઙ્ગર" દૃઢકાષ્ઠપૂતે ।
પાતાલગાહિ પ્રબિલપ્રખાતે સન્તોષતો ધ્યાયસિ નાગપૂતે ॥ ૩॥

પરાં હિ ભક્તિં ત્વનુસન્તતાં હરે તતોઽપિ કાષ્ઠાં પરમાં ચ ભક્તિગામ્ ।
ત્વમેવ મે સાધય સાધનં ત્વં ત્વત્ પારતન્ત્ર્યે ત્વભિષિક્તકોઽહમ્ ॥ ૪॥

વાણિજ્યે રુચિરસ્તિ સર્વજનતાસ્વેવં ચ રાજ્યે ભ્રમઃ
સ્વાર્થસ્યાઽઽર્જનમેવ મુખ્યમધુના નેતૃત્વલોભસ્તથા ।
લોભાધીનમિદં હિ સર્વપતનં પાપં નરાણાં હરે
લોભાચ્ચ્યાવય વર્તયાદ્ય સુપથે સર્વોદયેઽકણ્ટકે ॥ ૫॥

પ્રહ્લાદબાલાન્ વિરચય્ય સાધૂન્ સદાસમસ્તાનમલાનભીરુન્ ।
ત્વદીયવિદ્યોર્જિતવૈભવાંસ્તાન્ ત્વદીયગાનાઽભિમુખાન્ કુરુ ત્વમ્ ॥ ૬॥

બાલશિક્ષાપ્રવીણ ત્વં બાલશિક્ષારતો ભવ ।
સર્વત્ર વર્ધમાનાં ચ નીતિબાહિરતાં હર ॥ ૭॥

સ્વધર્મનિરતાન્ બાલાન્ સ્વધર્મૈકરુચીંસ્તથા ।
સ્વધર્મે નિધને શક્તાન્ નૃસિંહ કુરુ તાન્ ભવાન્ ॥ ૮॥

યોગાઽઽસનસ્થો હિ વિરાજતે ભવાન્ જિહ્વાં પ્રસાર્યાપિ ચ રાજસે મહન્ ।
હિરણ્યપક્ષં નનુ કોપવહ્નિના મનોવિપચાઽઽસ્વ સમત્વયુક્તઃ ॥ ૯॥

રાજ્યૈષણાત્યાગિન એવ લોકાન્ તથૈવ યૂનશ્ચ ભવત્ પ્રકામાન્ ।

ત્વદીય ચિત્રાર્પિતચિત્તવૃત્તીન્ હિરણ્યવિદ્યાવિમુખાન્ દ્રુતં કુરુ ॥ ૧૦॥

સર્વેષુ ધીરક્તિમયે પ્રચોદય સંસારબન્ધે પ્રરુચિં પ્રમોચય ।
ત્વદીયસેવાર્થમિદં સમસ્તં શ્રીમન્ નૃસિંહાઽચિરાત્ કુરુ ત્વમ્ ॥ ૧૧॥

નૃસિંહૈકાદશીમેનાં યઃ પઠેત્ ભક્તિભાગ્યવાન્ ।
સર્વસન્તાપમુક્તોઽસૌ મનઃ પ્રહ્લાદમૃચ્છતિ ॥ ૧૨॥

ઇતિ નૃસિંહૈકાદશી સમ્પૂર્ણા ।

Proofread by M K Barman

*Nrisimhaikadashi*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*